बन्ध्या, स्त्री, ( बन्ध+"अघ्न्यादयश्च ।" उणा० ४।११२। इति यक् ।) अप्रजस्त्री । इति मेदिनी ॥ बाँजा इति भाषा ॥ ( यथा, भागवते । ६ । १४ । १२ ।

"रूपौदार्य्यवयोजन्मविद्यैश्वर्य्यश्रियादिभिः ।
संपन्नस्य गुणैः सर्व्वैश्चिन्ता बन्ध्यापतेरभूत् ॥"

बन्ध्या स्त्री अष्टमे वर्षे अधिवेदनीया भवति यथाह मनुः । ९ । ८१ ।

"बन्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा ॥")

अपत्यशून्यगौः । तत्पर्य्यायः । वशा २ । इत्यमरः । २ । ९ । ६९ ॥ वालाख्यगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥ वृषलीविशेषः । यथा,—

"बन्ध्या च वृषली ज्ञेया वृषली च मृतप्रजा ।
अपरा वृषली ज्ञेया कुमारी या रजस्वला ॥"

इति प्रायश्चित्तविवेके उशनसो वचनम् ॥*॥ योनिरोगविशेषः । यथा,—

"उदावर्त्ता तथा बन्ध्या विप्लुता च परिप्लुता ।
वातला योनिजो रोगो वातदोषेण पञ्चधा ॥"

तस्या लक्षणं यथा,—

"सा फेनिलमुदावर्त्ता रजः कृच्छ्रेण मुञ्चति ।
बन्ध्या निरार्त्तवा ज्ञेया विप्लुता नित्यवेदना ॥
परिप्लुता या भवति ग्राम्यधर्म्मे रुजा भृशम् ।
वातला कर्कशास्तब्धा शूलनिस्तोदपीड़िता ॥"

तस्याश्चिकित्सा यथा,—

"बला सिता सातिबला मधूकं
वटस्य शुङ्गं गजकेशरञ्च ।
एतन्मधुक्षीरघृतैर्निपीय
बन्ध्या सुपुत्त्रं नियतं प्रसूते ॥
अश्वगन्धाकषायेण सिद्धं दुग्धं घृतान्वितम् ।
ऋतुस्नाताङ्गना प्रातः पीत्वा गर्भं दधाति हि ॥
पुष्योद्धृतं लक्ष्मणाया मूलं दुग्धेन कन्यया ।
पिष्ट्वा पीत्वा ऋतुस्नाता गर्भं धत्ते न संशयः ॥
कुरुण्टमूलं धातक्याः कुसुमानि वटाङ्कुराः ।
नीलोत्पलं पयोयुक्तमेवं गर्भप्रदं ध्रुवम् ॥
या बला पिबति पार्श्वपिप्पलं
क्षीरकेण सहितं हिताशना ।
श्वेतया विशिखपुङ्खया युतं
सा सुतं जनयतीह नान्यथा ॥"

इति भावप्रकाशः ॥

( चिकित्सान्तरमस्या यथा,—

"पिप्पल्यः शृङ्गवेरञ्च मरिचं केशरन्तथा ।
घृतेन सह पातव्यं बन्ध्यापि लभते सुतम् ॥"

इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापदधिकारे ॥

"बला चातिबला यष्टिशर्करा मधुसंयुता ।
बन्ध्यागर्भकरी पीता नात्र कार्य्या विचारणा ॥"

इति भैषज्यधन्वन्तरौ स्त्रीरोगाधिकारे ॥ )

बन्ध्याकर्कोटकी, स्त्री, ( बन्ध्यायाः कर्कोटकी । पुत्त्रदातृतया बन्ध्यायाः उपकारिणी अतोऽस्यास्तथात्वम् । ) तिक्तकर्कोटकी । बाँझखखसा इति बाँझचठेल इति बाँझककरोल इति च हिन्दीभाषा । तत्पर्य्यायः । बन्ध्या २ देवी ३ नागारातिः ४ नागहन्त्री ५ मनोज्ञा ६ पथ्या ७ दिव्या ८ पुत्त्रदा ९ वकन्दा १० श्रीकन्दा ११ कन्दवल्ली १२ ईश्वरी १३ सुगन्धा १४ सर्पदमनी १५ विषकण्टकिनी १६ परा १७ कुमारी १८ भूतहन्त्री १९ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । कफापहत्वम् । स्थावरादिविषघ्नत्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।

"बन्ध्याकर्कोटकी देवी कन्या योगेश्वरीति च ।
नागारिर्भक्तदमनी विषकण्टकिनी तथा ॥
बन्ध्याकर्कोटकी लघ्वी कफनुद्व्रणशोधिनी ।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी ॥"

इति भावप्रकाशः ॥

ब(व)भ्र, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ब(व)कारादिः । ओष्ठ्यवर्गचतुर्थोपधः । ब(व)भ्रति । इति दुर्गादासः ॥

बभ्रवी, स्त्री, (बभ्रोः शिवस्येयं पत्नी । बभ्रु+अण्+ङीप् । न वृद्धिः ।) दुर्गा । इति भूरिप्रयोगः ॥

बभ्रिः, पुं, ( बभ्र+इन् । ) वस्त्रम् । इति केचित् ॥ ( भरणकर्त्तरि धारके च त्रि । यथा, ऋग्वेदे । ६ । २३ । ४ ।

"गन्तेयान्ति सवना हरिभ्यां
बभ्रिर्वज्रं पपिः सोमं ददिर्गाः ॥")

बभ्रुः, पुं, ( बिभर्त्ति भरति वा । भृ+"कुर्भ्रश्च ।" उणा० १ । २३ । इति कुर्द्वित्वञ्च । ) अग्निः । शिवः । ( यथा, महाभारते १३ । महादेवस्य सहस्रनामकथने । १७ । १४८ ।

"शृङ्गी शृङ्गप्रियो बभ्रू राजराजो निरामयः ॥")

विष्णुः । ( यथा, महाभारते १३ । विष्णोः सहस्रनामकथने । १४९ । २६ ।

"रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ॥")

विशालः । नकुलः । इति मेदिनी ॥ ( यथा, मार्कण्डेये । १५ । ९ ।

"सञ्जायते महावक्त्रो कृमिको बभ्रुसन्निभः ॥")

मुनिविशेषः । इति हेमचन्द्रः ॥ देशभेदः । इति शब्दरत्नावली ॥ सितावरशाकः । इति राजनिर्घण्टः ॥ खलतिः । इति हेमचन्द्रः । ३।११७॥ (कपिलो वर्णः । इति मेधातिथिः ॥ तद्गुणयुक्ते तु वाच्यलिङ्गः । यथा, मनुः । ४ । १३० ।

"नाक्रामेत्कामतश्छायां बभ्रुणो दीक्षितस्य च ॥"

लोमपादसुतः । यथा, भागवते ।९।२४।१।

"रोमपादसुतो बभ्रुर्बभ्रोः कृतिरजायत ।"

देवावृधसुतः । यथा, तत्रैव । ९ । २४ । ९ ।

"बभ्रुर्देवावृधसुतस्तयोः श्लोकौ पठन्त्यमू ॥"

ययातिपुत्त्रस्य द्रुह्योः सुतः । यथा, तत्रैव । ९ । २३ । १४ ।

"द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः ॥"

पञ्चगन्धर्व्वपतिषु अन्यतरः । यथा, रामायणे । ४ । ४१ । ४२ ।

"तत्र गन्धर्व्वपतयः पञ्च सूर्य्यसमप्रभाः ।
शैलूषो ग्रामणीः शिक्षः शुको बभ्रुस्तथैव च ॥"

विश्वामित्रपुत्त्रभेदः । यथा, महाभारते । १३ । ४ । ५० ।

"अक्षीणश्च शकुन्तश्च बभ्रुः कालपथस्तथा ॥"

विश्वगर्भस्य पुत्त्रः । स तु यादवानामन्यतमः । यथा, हरिवंशे । ९४ । ४८ ।

"वसुर्बभ्रुः सुषेणश्च सभाक्षश्चैव वीर्य्यवान् ।
यदुप्रवीरा विख्याता लोकपाला इवापरे ॥"

यथा च माघे । २ । ४० ।

"आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत् ॥"

स च विनष्टप्राये यादवकुले पथि गच्छन् दस्युभिर्हतः । तत्कथा च महाभारते । १६ । मौषलपर्व्वणि द्रष्टव्या ॥ स्त्री, कपिला गौः । सा च निशि अजानता पृषध्रेण खड्गेन हता । यथा, भागवते । ९ ।२ । ६ ।

"खड्गमादाय तरसा प्रलीनोडुगणे निशि ।
अजानन्नहनद्बभ्रोः शिरः शार्द्दूलशङ्कया ॥")

बभ्रुः, त्रि, (बिभर्त्तीति । भृ+"कुर्भ्रश्च ।" उणा० १ । २३ । इति कुर्द्वित्वञ्च । ) पिङ्गलः । इत्यमरः ॥ ( यथा, कुमारे । ५ । ८ ।

"बबन्ध. बालारुणबभ्रुवल्कलं
पयोधरोत्सेधविशीर्णसंहतिः ॥"

यथा च रघुः । १५ । १६ ।

"धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः ॥")

बभ्रुधातुः, पुं, ( बभ्रुः पिङ्गलो धातुः । ) सुवर्णगैरिकम् । इति राजनिर्घण्टः ॥

बभ्रुवाहनः, पुं, मणिपुरस्य राजविशेषः । स च चित्राङ्गदायां अर्ज्जुनाज्जातः । यथा,—

"करेणुमत्यां नकुलो निरमित्रं तथार्ज्जुनः ।
इरावन्तमुलूप्यां वै सुतायां बभ्रुवाहनम् ॥
मणिपुरपतेः सोऽपि तत्पुत्त्रः पुत्त्रिकासुतः ॥"

इति श्रीभागवते । ९ । २२ । ३२ ॥

अपि च ।

वैशम्पायन उवाच ।

"श्रुत्वा तु नृपतिः प्राप्तं पितरं बभ्रुवाहनः ।
निर्ययौ विनयेनाथ ब्राह्मणार्घ्यपुरःसरः ॥
मणिपुरेश्वरन्त्वेवमुपायातं धनञ्जयः ।
नाभ्यनन्दत् स मेधावी क्षात्रधर्म्ममनुस्मरन् ॥"
"भर्त्तारं निहतं दृष्ट्वा पुत्त्रञ्च पतितं भुवि ।
चित्राङ्गदा परित्रस्ता प्रविवेश रणाजिरे ॥"

इति महाभारते । १४ । ७९ अध्यायः ॥

( अस्यार्ज्जुनादिना युद्धादिकं तत्रैव विस्तरशो द्रष्टव्यम् ॥ )

बम्ब, गतौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) बम्बति । इति दुर्गादासः ॥

बर्ब्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । ) बर्ब्बति । इति दुर्गादासः ॥

बर्ब्बटः, पुं, ( बर्ब्ब+अटन् । ) राजमाषः । इति त्रिकाण्डशेषः ॥ बर्ब्बटी इति ख्यातः ॥ (विवृतिरस्या राजमाषशब्दे ज्ञेया ॥)

बर्ब्बटी, स्त्री, ( बर्ब्बट+गौरादित्वात् ङीष् । ) पण्ययोषा । व्रीहिभेदः । इति मेदिनी । टे, ५१ ॥

बर्ह, ङ स्तुतौ । हिंसायाम् । दाने । वाचि । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-सक०